**BG Ch 2 V 21 with transliteration**

य एनं वेत्ति हन्तारमित्यनेन मन्त्रेण हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय न जायते इत्यनेनाविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति --

ya enaṁ vetti hantāramityanena mantreṇa hananakriyāyāḥ kartā karma ca na bhavatīti pratijñāya na jāyate ityanenāvikriyatvaṁ hetumuktvā pratijñātārthamupasaṁharati –

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ २१॥

vedāvināśinaṁ nityaṁ ya enamajamavyayam |
kathaṁ sa puruṣaḥ pārtha kaṁ ghātayati hanti kam || 21 ||

वेद विजानात्यविनाशिनमन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति संबन्धः।

veda vijānātyavināśinamantyabhāvavikārarahitaṁ nityaṁ vipariṇāmarahitaṁ yo vedeti sambandhaḥ |

एनं पूर्वेण मन्त्रेणोक्तलक्षणमजं जन्मरहितमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान्पुरुषोऽधिकृतो हन्ति हननक्रियां करोति कथं वा घातयति हन्तारं प्रयोजयति।

enaṁ pūrveṇa mantreṇoktalakṣaṇamajaṁ janmarahitamavyayamapakṣayarahitaṁ kathaṁ kena prakāreṇa sa vidvānpuruṣo'dhikṛto hanti hananakriyāṁ karoti kathaṁ vā ghātayati hantāraṁ prayojayati |

न कथंचित्कंचिद् हन्ति न कथंचित्कंचिद् घातयतीत्युभयत्राक्षेपैवार्थः प्रश्नार्थासंभवात्।

na kathañcitkañcid hanti na kathañcitkañcid ghātayatītyubhayatrākṣepaivārthaḥ praśnārthāsambhavāt |

हेत्वर्थस्य चाविक्रियत्वस्य तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भगवता। हन्तेस्त्वाक्षेप उदाहरणार्थत्वेन कथितः॥

hetvarthasya cāvikriyatvasya tulyatvādviduṣaḥ sarvakarmapratiṣedha eva prakaraṇārtho'bhipreto bhagavatā | hantestvākṣepa udāharaṇārthatvena kathitaḥ ||

विदुषः कं कर्मासंभवहेतुविशेषं पश्यन्कर्माण्याक्षिपति भगवान्कथं स पुरुष इति। ननूक्त एवात्मनोऽविक्रियत्वं सर्वकर्मासंभवकारणविशेषः। सत्यमुक्तः।

viduṣaḥ kaṁ karmāsambhavahetuviśeṣaṁ paśyankarmāṇyākṣipati bhagavānkathaṁ sa puruṣa iti | nanūkta evātmano'vikriyatvaṁ sarvakarmāsambhavakāraṇaviśeṣaḥ | satyamuktaḥ |

न तु सः कारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियादात्मनः।

na tu saḥ kāraṇaviśeṣo'nyatvādviduṣo'vikriyādātmanaḥ |

न ह्यविक्रियं स्थाणुं विदितवतः कर्म न संभवतीति चेन्न विदुष आत्मत्वात्।

na hyavikriyaṁ sthāṇuṁ viditavataḥ karma na sambhavatīti cenna viduṣa ātmatvāt |

न देहादिसंघातस्य विद्वत्ता। अतः पारिशेष्यादसंहत आत्मा विद्वानविक्रिय इति तस्य विदुषः कर्मासंभवादाक्षेपो युक्तः कथं स पुरुष इति।

na dehādisaṅghātasya vidvattā | ataḥ pāriśeṣyādasaṁhata ātmā vidvānavikriya iti tasya viduṣaḥ karmāsambhavādākṣepo yuktaḥ kathaṁ sa puruṣa iti |

यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेनाविद्यया उपलब्धा आत्मा कल्प्यते

एवमेवात्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्ययासत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते ।

yathā buddhyādyāhṛtasya śabdādyarthasyāvikriya eva san buddhivṛttyavivekavijñānenāvidyayā upalabdhā ātmā kalpyate evamevātmānātmavivekajñānena buddhivṛttyā vidyayāsatyarūpayaiva paramārthato'vikriya evātmā vidvānucyate |

विदुषः कर्मासंभववचनाद्यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते ॥

viduṣaḥ karmāsambhavavacanādyāni karmāṇi śāstreṇa vidhīyante tānyaviduṣo vihitānīti bhagavato niścayo'vagamyate ||

ननु विद्याप्यविदुष एव विधीयते विदितविद्यस्य पिष्टपेषणवद्विद्याविधानानर्थक्यात् । तत्राविदुषः कर्माणि विधीयन्ते न विदुष इति विशेषो नोपपद्यते इति चेन्नानुष्ठेयस्य भावाभावविशेषोपपत्तेः ।

nanu vidyāpyaviduṣa eva vidhīyate viditavidyasya piṣṭapeṣaṇavadvidyāvidhānānarthakyāt | tatrāviduṣaḥ karmāṇi vidhīyante na viduṣa iti viśeṣo nopapadyate iti cennānuṣṭheyasya bhāvābhāvaviśeṣopapatteḥ |

अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं कर्ताहं मम कर्तव्यमित्येवंप्रकारविज्ञानवतोऽविदुषो यथानुष्ठेयं भवति न तु तथा न जायत इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवति किं तु नाहं कर्ता नाहं भोक्ता इत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानान्नान्यदुत्पद्यत इत्येष विशेष उपपद्यते ।

agnihotrādividhyarthajñānottarakālamagnihotrādikarmānekasādhanopasaṁhārapūrvakamanuṣṭeyaṁ kartāhaṁ mama kartavyamityevamprakāravijñānavato'viduṣo yathānuṣṭeyaṁ bhavati na tu tathā

na jāyata ityādyātmasvarūpavidhyarthajñānottarakālabhāvi kiñcidanuṣṭheyaṁ bhavati kiṁ tu nāhaṁ kartā nāhaṁ bhoktā ityādyātmaikatvākartṛtvādiviṣayajñānānnānyadutpadyata ityeṣa viśeṣa upapadyate |

यः पुनः कर्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्तव्यमित्यवश्यंभाविनी बुद्धिः स्यात्तदपेक्षया सोऽधिक्रियत इति तं प्रति कर्माणि संभवन्ति ।

yaḥ punaḥ kartāhamiti vettyātmānaṁ tasya mamedaṁ kartavyamityavaśyambhāvinī buddhiḥ syāttadapekṣayā so'dhikriyata iti taṁ prati karmāṇi sambhavanti |

स चाविद्वानुभौ तौ न विजानीत इति वचनाद्विशेषितस्य च विदुषः कर्माक्षेपवचनाच्च कथं स पुरुष इति । तस्माद्विशेषितस्याविक्रियात्मदर्शिनो विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः ।

sa cāvidvānubhau tau na vijānīta iti vacanādviśeṣitasya ca viduṣaḥ karmākṣepavacanācca kathaṁ sa puruṣa iti | tasmādviśeṣitasyāvikriyātmadarśino viduṣo mumukṣośca sarvakarmasannyāsa evādhikāraḥ |

अत एव भगवान्नारयणः सांख्यान्विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति । तथा च पुत्रायाह भगवान्व्यासो द्वाविमावथ पन्थानौ इत्यादि ।

ata eva bhagavānnārayaṇaḥ sāṅkhyānviduṣo'viduṣaśca karmiṇaḥ pravibhajya dve niṣṭhe grāhayati jñānayogena sāṅkhyānāṁ karmayogena yogināmiti | tathā ca putrāyāha bhagavānvyāso dvāvimāvatha panthānau ityādi |

तथा च क्रियापथश्चैव पुरस्तात्पश्चात्संन्यासश्चेति । एवमेव विभागं पुनः पुनर्दर्शयिष्यति भगवानतत्त्वविदहंकारविमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्तु नाहं करोमीति । तथा च सर्वकर्माणि मनसा संन्यस्यास्त इत्यादि ॥

tathā ca kriyāpathaścaiva purastātpaścātsannyāsaśceti | evameva vibhāgaṁ punaḥ punardarśayiṣyati bhagavānatattvavidahaṅkāravimūḍhātmā kartāhamiti manyate tattvavittu nāhaṁ karomīti | tathā ca sarvakarmāṇi manasā sannyasyāsta ityādi ||

तत्र केचित्पण्डितंमन्या वदन्ति जन्मादिषड्भावविक्रियारहितोऽविक्रियोऽकर्तैकोऽहमात्मेति न कस्यचिज्ज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यत इति । तन्न न जायत इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात् ।

tatra kecitpaṇḍitammanyā vadanti janmādiṣaḍbhāvavikriyārahito'vikriyo'kartaiko'hamātmeti na kasyacijjñānamutpadyate yasminsati sarvakarmasannyāsa upadiśyata iti | tanna na jāyata ityādiśāstropadeśānarthakyaprasaṅgāt |

यथा च शास्त्रोपदेशसामर्थ्याद्धर्माधर्मास्तित्वविज्ञानं कर्तुश्च देहान्तरसंबन्धविज्ञानमुत्पद्यते तथा शास्त्रात्तस्यैवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्या ते ।

yathā ca śāstropadeśasāmarthyāddharmādharmāstitvavijñānaṁ kartuśca dehāntarasambandhavijñānamutpadyate tathā śāstrāttasyaivātmano'vikriyatvākartṛtvaikatvādivijñānaṁ kasmānnotpadyata iti praṣṭavyā te |

करणागोचरत्वादिति चेन्न मनसैवानुद्रष्टव्यमिति श्रुतेः। शास्त्राचर्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्। तथा च तदधिगमायानुमान आगमे च सति ज्ञानं नोत्पद्यत इति साहसमात्रमेतत्।

karaṇāgocaratvāditi cenna manasaivānudraṣṭavyamiti śruteḥ | śāstrācaryopadeśaśamadamādisaṁskṛtaṁ mana ātmadarśane karaṇam | tathā ca tadadhigamāyānumāna āgame ca sati jñānaṁ notpadyata iti sāhasamātrametat |

ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यम्। तच्चाज्ञानं दर्शितं हन्ताहं हतोऽस्मीत्युभौ तौ न विजानीत इति।

jñānaṁ cotpadyamānaṁ tadviparītamajñānamavaśyaṁ bādhata ityabhyupagantavyam | taccājñānaṁ darśitaṁ hantāhaṁ hato'smītyubhau tau na vijānīta iti |

ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यम्। तच्चाज्ञानं दर्शितं हन्ताहं हतोऽस्मीत्युभौ तौ न विजानीत इति। अत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शितम्।

jñānaṁ cotpadyamānaṁ tadviparītamajñānamavaśyaṁ bādhata ityabhyupagantavyam | taccājñānaṁ darśitaṁ hantāhaṁ hato'smītyubhau tau na vijānīta iti | atra cātmano hananakriyāyāḥ kartṛtvaṁ karmatvaṁ hetukartṛtvaṁ cājñānakṛtaṁ darśitam |

तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनः। विक्रियवान्हि कर्तात्मनः कर्मभूतमन्यं प्रयोजयति कुर्विति।

tacca sarvakriyāsvapi samānaṁ kartṛtvāderavidyākṛtatvamavikriyatvādātmanaḥ | vikriyavānhi kartātmanaḥ karmabhūtamanyaṁ prayojayati kurviti |

तदेतदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान्वासुदेवो विदुषः कर्माधिकाराभावप्रदर्शनार्थं वेदाविनाशिनं   कथं स पुरुष इत्यादिना । क्व पुनः विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव ज्ञानयोगेन सांख्यानामिति । तथा च सर्वकर्मसंन्यासं वक्ष्यति सर्वकर्माणि मनसा इत्यादिना ॥

tadetadaviśeṣeṇa viduṣaḥ sarvakriyāsu kartṛtvaṁ hetukartṛtvaṁ ca pratiṣedhati bhagavānvāsudevo viduṣaḥ karmādhikārābhāvapradarśanārthaṁ vedāvināśinaṁ   kathaṁ sa puruṣa ityādinā | kva punaḥ viduṣo'dhikāra ityetaduktaṁ pūrvameva jñānayogena sāṅkhyānāmiti| tathā ca sarvakarmasannyāsaṁ vakṣyati sarvakarmāṇi manasā ityādinā ||

ननु मनसेति वचनान्न वाचिकानां कायिकानां च संन्यास इति चेन्न सर्वकर्माणीति विशेषितत्वात् ।

nanu manaseti vacanānna vācikānāṁ kāyikānāṁ ca sannyāsa iti cenna sarvakarmāṇīti viśeṣitatvāt |

मानसानामेव सर्वकर्मणामिति चेन्न मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावे तदनुपपत्तेः । शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वान्यानि सर्वकर्माणि मनसा संन्यस्येदिति चेन्न नैव कुर्वन्न कारयन्निति विशेषणात् । सर्वकर्मसंन्यासोऽयं भगवतोक्तो मरिष्यतो न जीवत इति चेन्न नवद्वारे पुरे देह्यास्त इति विशेणानुपपत्तेः ।

mānasānāmeva sarvakarmaṇāmiti cenna manovyāpārapūrvakatvādvākkāyavyāpārāṇāṁ manovyāpārābhāve tadanupapatteḥ | śāstrīyāṇāṁ vākkāyakarmaṇāṁ kāraṇāni mānasāni karmāṇi varjayitvānyāni sarvakarmāṇi manasā sannyasyediti cenna naiva kurvanna kārayanniti viśeṣaṇāt | sarvakarmasannyāso'yaṁ bhagavatokto mariṣyato na jīvata iti cenna navadvāre pure dehyāsta iti viśeṇānupapatteḥ |

न हि सर्वकर्मसंन्यासेन मृतस्य तद्देह आसनं संभवति। अकुर्वतोऽकारयतश्च देहे संन्यस्येति संबन्धो न देह आस्त इति चेन्न सर्वत्रात्मनोऽविक्रियत्वावधारणादासनक्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य।

na hi sarvakarmasannyāsena mṛtasya taddeha āsanaṁ sambhavati|
akurvato'kārayataśca dehe sannyasyeti sambandho na deha āsta iti cenna
sarvatrātmano'vikriyatvāvadhāraṇādāsanakriyāyāścādhikaraṇāpekṣatvāttadana
pekṣatvācca sannyāsasya |

संपूर्वस्तु न्यासशब्दोऽत्र त्यागार्थो न निक्षेपार्थः। तस्माद्गीताशास्त्र आत्मज्ञानवतः संन्यास एव अधिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः॥

sampūrvastu nyāsaśabdo'tra tyāgārtho na nikṣepārthaḥ | tasmādgītāśāstra
ātmajñānavataḥ sannyāsa eva adhikāro na karmaṇīti tatra
tatropariṣṭādātmajñānaprakaraṇe darśayiṣyāmaḥ ||